# लघु सिद्धांत कौमुदी विषयक वक्तव्य: 03

# अच् संधि प्रकरण: यणत्व-विधान

(ललित नारायण मिथिला विश्वविद्यालय के संस्कृत ऑनर्स प्रथम वर्षीय छात्र-छात्राओं के प्रथम पत्र की द्वितीय अन्विति 'लघु सिद्धांत कौमुदी' विषयक अच् संधि प्रकरण मूल संस्कृत भाष्य सहित)

**पाठ्य संकलनकर्त्ता:** डॉ. विकास सिंह, संस्कृत विभागाध्यक्ष, मारवाड़ी कॉलेज, ललित नारायण मिथिला विश्वविद्यालय, दरभंगा, बिहार।

## यणत्व विधायक सूत्र

**इको यणचि॥**

इकः स्थाने यण् स्यादचि संहितायां विषये। सुधी उपास्य इति स्थिते॥

**तस्मिन्निति निर्दिष्टे पूर्वस्य॥**

सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यम्॥

**स्थाने ऽन्तरतमः॥**

प्रसङ्गे सति सदृशतम आदेशः स्यात्। सुध्य् उपास्य इति जाते॥

**अनचि च॥**

अचः परस्य यरो द्वे वा स्तो न त्वचि। इति धकारस्य द्वित्वेन सुध्ध्य् उपास्य इति जाते॥

**झलां जश् झशि॥**

स्पष्टम्। इति पूर्वधकारस्य दकारः॥

**संयोगान्तस्य लोपः॥**

संयोगान्तं यत्पदं तदन्तस्य लोपः स्यात्॥

**अलो ऽन्त्यस्य॥**

षष्ठीनिर्दिष्टाऽन्त्यस्याल आदेशः स्यात्। इति यलोपे प्राप्ते - *(यणः प्रतिषेधो वाच्यः)*। सुद्ध्युपास्यः। मद्ध्वरिः। धात्त्रशः। लाकृतिः॥

यथा- सुद्ध्युपास्यः- "सुधी+ उपास्यः" इति स्थिते " इको यणचि" इति सूत्रेण ' तस्मिन्निति निर्दिष्टे पूर्वस्य' इति परिभाषैकवाक्यतया ईकारस्य 'स्थानेन्तरतमः' परिभाषैकवाक्यतया अन्तरतमे यकाररूपयणादेशे 'अनचि च' इति सूत्रेण धकारस्य द्वित्वे 'झलां जश् झशि' इति सूत्रेण पूर्वधकारस्य जशत्वेन दकारे 'यणो मयो द्वे वाच्ये' इति वार्त्तिकेन मय इति पञ्चमी यण इति षष्ठी इति पक्षे यकारस्य द्वित्वे 'सु द् ध् य् युपास्यः" इत्येकं रूपं सिद्ध्यति।

यण इति पञ्चमी मय इति षष्ठी इति पक्षे 'यणो मयो द्वे वाच्ये' इति वार्त्तिकस्याप्राप्त्या यकारद्वित्वाभवे द्विधमेकयं " सुद्ध्युपास्यः' इति। 'अनचि च' इत्यस्यापि विकल्पतया तदभावपक्षे ' यणो मयो द्वे वाच्ये' इत्यस्य प्रवृत्तिपक्षे एकधं द्वियं 'सुध्य्युपास्यः' इति। 'अनचि च' 'यणो मयो द्वे वाच्ये' इत्युभयोरपि वैकल्पिकत्वादप्रवृत्तौ एकधमेकयं "सुध्युपास्यः' इति।